Roll No. : ......................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# APMA–318

## M.A. (Previous) Examination, 2023

## SANSKRIT

Paper - II

## (ललित-साहित्य तथा साहित्यशास्त्र)

*Time : 3 Hours* ] [ *Maximum Marks : 100*

**खण्ड–अ** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. समस्तानां दशप्रश्नानामुत्तराणि ददातु। प्रत्येकं प्रश्नस्योत्तरसीमा पञ्चाशत् **50** शब्दाः सन्तिः–

   (i) कश्चिद् यक्षः रामगिर्याश्रमेषु केन कारणेन वसतिं चक्रे ? (संस्कृतेनोत्तरं ददातु)

   (ii) ''कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा।
   नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥''
   पद्यांशस्य भावार्थः संस्कृतभाषायां लेखनीयः।

(iii) 'मृच्छकटिकम्' इति प्रकरणस्य चारूदत्तस्य कः सेवकः द्यूतकरः अभवत् ?

(iv) चारूदत्तस्य गृहे आभूषणानां चौरः पात्रं कोऽस्ति ?

(v) 'शाल्मलीतरूवर्णनम्' कस्मिन् काव्ये दृश्यते ?

(vi) 'विन्ध्याटवीवर्णनम्' स्वशब्दैः विधीयताम्।

(vii) विश्वनाथेन कस्य काव्यलक्षणस्य खण्डनं प्रद्यानत्वेन कृतम् ?

(viii) 'विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः' सा का वृत्तिः ?

(ix) 'गंगायां घोषः' उदाहरणेऽस्मिन् का लक्षणा ?

(x) मुख्यार्थ बाधे सति प्रयोजनवशात् रूढ़िशाद्वा या वृत्तिः प्रयुज्यते, सा का वृत्तिः ?

## खण्ड–ब

**नोट** :– सप्तषु केषाञ्चित् पञ्च प्रश्नानाम् उत्तराणि लिखतु।

2. अस्य श्लोकस्य संस्कृत व्याख्या विधेया। (अनिवार्यतः)

सा संन्यस्ताभरणणबला पेशलं धारयन्ती,
शय्योत्संगे निहितमसकृद् दुःखदुःखेन गात्रम्।
त्वामप्यस्त्रं नवजलमयं मोचयिष्यत्यवश्यम्,
प्रायः सर्वोभवति करुणा वृत्तिरार्द्रान्तरात्मा॥

3. अधस्तनस्य श्लोकस्य व्याख्या विधेया–

वीचिक्षोभ स्तनित विहगश्रेणिकाञ्चीगुणायाः,
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभे।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य,
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥

4. अस्य श्लोकस्य संस्कृत व्याख्या कार्या। (अनिवार्यत:)

सुखं हि दु:खान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम्।

सुखात्तु यो याति नरो दरिद्रतां धृत: शरीरेण मृत: सजीवति॥

5. अधस्तनस्य गद्यांशस्य सप्रसंगा व्याख्या विधेया–

एकस्मिंश्च जीर्णकोटरे जायया सह निवसत: पश्चिमे वयसि वर्तमानस्य कथमपि पितुरहमेवैको विधिवशात् सूनुरभवम्। अति प्रबलया चाभिभूता ममैव जायमानस्य प्रसववेदनया जननी मे परलोकमगमत्। अभिमतजायाविनाशदु:खितोऽपि खलु तात: सुतस्नेहादन्तर्निगृह्य पटुप्रसरमपि शोकमेकाकी मत्संवर्धनपर एवाभवत्।

6. अधस्तनाया: कारिकाया: व्याख्या विधेया–

तत्र संकेतितार्थस्य बोधनादग्रिमाभिद्या।

संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च॥

7. अधस्तनाया: कारिकाया: व्याख्या विधेया–

भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ।

अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च॥

8. अधस्तनाया: गद्यांशस्य सप्रसंग अनुवादो कुरू–

अभिनवयौवनमपि क्षपितबहुवयसम् कृतसारमेय संग्रहमपि फलमूलाशनम्, कृष्णमप्यसुदर्शनम्, स्वच्छप्रचारमपि दुर्गैकशरणम् क्षितिभृत्पादानुवर्तनमपि राजसेवानभिज्ञम्, अपत्यमिव विन्ध्याचलस्य अंशावतारमिव कृतान्तस्य सहोदरमिव पापस्य सारमिव कलिकालस्य भीषणमपि महासत्त्वतया गम्भीरमिवोपलक्ष्यमाणम् शबरसेनापतिमपश्यम्॥

**खण्ड–स**

**नोट** :– अधोलिखितेषु प्रश्नेषु कयोश्चिद् द्वयोः प्रश्नयोः उत्तरं लिखत।

9. मेघदूतानुसारं प्रकृति–चित्रणं कुरू।

10. 'मृच्छकटिकम्' ग्रंथानुसारं नायकस्य चरित्र–चित्रणं सोद्धहरणं क्रियताम्।

11. विश्वनाथभिमतायाः लक्षणायाः भेदान् वर्णयत।

12. साहित्यदर्पणानुसारं रसस्य स्वरूपं अलौकिकताञ्च वर्णयत।